# द्वितीयसमाकलनपरीक्षा, 2018-19

## संस्कृतम्

**अवधिः - होरात्रयम्** **कक्षा - नवमी** **पूर्णांकाः - अशीतिः**

**विद्यार्थिनः नाम** ............................................................................................ **वर्गः** ....... **दिनांकः - 20.9.2018 (गुरूवासरः)**

**निर्देशाः -**

- प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
  - खण्डः (क) अपठित-अवबोधनम् - 05 अङ्काः
  - खण्डः (ख) रचनात्मक – कार्यम् - 15 अङ्काः
  - खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 25 अङ्काः
  - खण्डः (घ) पठित– अवबोधनम् - 35 अङ्काः
- सर्वे प्रश्नाः अनिवार्याः सन्ति।
- प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि।
- उत्तराणि संस्कृतेनैव लेखनीयानि।
- प्रश्नसंख्या अवश्यमेव लेखनीया।

## खण्डः - क (अपठितावबोधनम् - 5 अंकाः)

**प्र.1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -**

भारतदेशः अस्माकम् प्रियः देशः। एषः देशः देशानां शिरोमणिः खलु। अस्य प्राकृतिकं सौन्दर्यं बलवत् मनः मोहयति। अस्य उत्तरदिशायां पर्वतराजः हिमालयः विराजते। एषः पर्वतः भारतस्य प्रहरी खलु। भारतस्य दक्षिणदिशायां महासागरः अस्य चरणौ प्रक्षालयति। अस्य अङ्के अनेकाः नद्यः क्रीडन्ति। एतासां नदीनां तटेषु महान्ति नगराणि विराजन्ते। एतासां नदीनां जलं क्षेत्राणां सिञ्चनाय विद्युत-उत्पादनाय च प्रयुज्यते। भारतस्य हरित-हरितानि वनानि अस्य शोभां निरन्तरं वर्धयन्ति।

**अ) एकपदेन उत्तरत -** **(½×4=2)**

अ) कः देशः अस्माकम् प्रियः वर्तते ?

ब) एषः देशः केषां शिरोमणिः वर्तते ?

स) हिमालयः खलु कस्य प्रहरी अस्ति ?

द) पर्वतराजः हिमालयः भारतस्य कस्मिन् भागे विराजते ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) नदीनां जलं किमर्थम् प्रयुज्यते ?

ब) कः कुत्र च भारतस्य चरणौ प्रक्षालयति ?

**स) भाषिक कार्यम् -** **(½×2=1)**

अ) 'पर्वतराजः' इति विशेषणस्य विशेष्यः कः ?

ब) अनुच्छेदे 'लघूनि' इति पदस्य कः विपर्ययः आगतः ?

क) वनानि ख) नगराणि ग) महान्ति घ) हरितानि

## खण्डः - ख (रचनात्मककार्यम् - 15 अंकाः)

**प्र.2** **भवत्याः नाम लतिका । भवती 'सुरवाणीसन्देशः' इति पत्रिकां पठति । ग्राहकशुल्के समाप्ते सति अग्रिमवर्षार्थं शुल्कप्रेषणाय अत्र लिखिते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत ।** **(½×10=5)**

८८, आदर्शनगरम्,
नवदेहली-११००३३
दिनांकः २०.०९.२०१८

(1)……………सम्पादकमहोदय,

सादरम् .........(2).........।

अहम् 'सुरवाणीसन्देशः' इति...... (3)……..नियमिता पाठिका अस्मि । मम......( 4)……..अस्य वर्षस्य दिसम्बरमासे समाप्तम् भवति । अतः अनेन पत्रेण......( 5)…….वार्षिकं ग्राहकशुल्कं ११०/- रुप्यकाणि स्टेट बैंक आफ इण्डिया' इति द्वारा.......( 6)……बैंक ड्राफ्ट संख्या ४००५६/१४/०९/२०१६ दिनांकितं ..........( 7)...........करोमि । कृपया प्राप्तिपत्रं........... (8)……….अनुगृहीतां कुर्वन्तु ।

...........(9)……… ।

........(10)........., संस्कृतोपासिका,
लतिका

**मञ्जूषा -** पत्रिकायाः, सधन्यवादम्, सार्धम्, आदरणीय, संलग्नम्, ग्राहकशुल्कम्, भवदीया, प्रेषयित्वा, वन्दे, प्रदेयम् ।

**प्र.3** **मञ्जूषायां प्रदत्तैः पदैः चित्रस्य वर्णनं पञ्चसु संस्कृतवाक्येषु कुरुत -** **(1×5=5)**



**मञ्जूषा -** ग्राम्यजीवनम्, जलाशयः, कमलानि, मृत्तिकागृहाणि, वृक्षाः, कृषकाः, पक्षिणः, उद्यानानि, जनाः, सरलम् कुर्वन्ति, रचयन्ति, फलन्ति, उत्पतन्ति

**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया "भारतीय संस्कृतिः" इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।

**मञ्जूषा -** अन्तःकरणस्य अलंकरणम्, संस्कृतिः संस्कारेण जायते, भारतीया संस्कृतिः, विश्वे सर्वोच्च स्थानं धारयति, ज्ञानवर्धिका, महापुरुषाणां ऋषीणाञ्च जीवनीशक्तिः, आत्मनः शोभा, जीवनमूल्यस्य रक्षणं, परोपकारिका

**प्र.4 अधोलिखितानाम् वाक्यानाम् संस्कृतेन अनुवादं कुरुत।** **(1×5=5)**

(क) तुम दोनों पुस्तक पढते हो।

(ख) तुम सब कब आओगे ?

(ग) मोहन कल दिल्ली जाएगा।

(घ) वे सब खेलती हैं।

(ङ) नगर के चारों ओर नदी है।

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अंकाः)

**प्र.5 अधोलिखितानां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–** **(1×2=2)**

(i) 'ऋ' वर्णस्य उच्चारणस्थानं किम् अस्ति ?

(ii) 'सम्राट्' इति पदे नासिकावर्णं लिखत।

रिक्तस्थानं पूरयत - **(½×2=1)**

(iii) ज्ञानम् - ज् +......... + आ + न् + अ + म्।

(iv) विद्वांसः – व् + इ + द् + व् + आ + न् + .......... + अः।

**प्र.6 अधोलिखितवाक्येषु रेखांकितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत–** **(1×4=4)**

(i) तत्र <u>बालक: + अपि</u> अस्ति।

(ii) अनेक <u>संशयोच्छेदि</u> परोक्षार्थस्य दर्शकम्।

(iii) तस्य <u>मुखादमृतं</u> वचः श्रोतुम् जनाः आगच्छन्ति।

(iv) भवान् <u>निर्+रसं</u> जलं किमर्थं पिबति ?

**प्र.7 उचितैः शब्दरूपैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत–** **(1×6=6)**

(i) अयं ................... विद्यालये पठति। (छात्र)

(ii) गुरुः ...................आशीर्वादं यच्छति। (छात्रा)

(iii) ..................बालकाय पुस्तकं प्रयच्छ। (तत्)

(iv) ......................बालकाः तरन्ति। (नदी)

(v) कक्षायाम् ................बालकाः सन्ति। (चतुर्)

(vi) कालिदासस्य ................. नाटकानि सन्ति। (त्रि)

**प्र.8 उचितैः धातुरूपैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत–** **(1×3=3)**

(i) श्वः शिष्या: तत्र .......................। (भू)

(ii) ह्यः शनिवासरः .........................। ( अस्)

(iii) त्वम् अतिथीन् ..........................। ( सेव् – लट्लकारः )

**प्र.9 कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपेण वाक्यानि पूरयत–** **(1×4=4)**

(i) भक्ताः कथयन्ति................स्वाहा। (शारदा)

(ii) इदं...................अभितः वृक्षाः सन्ति। (नगर)

(iii) अलम् मिथ्या.........................। (भाषण)

(iv) बालकः .......................विभेति। (चौर)

**प्र.10 रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत–** **(1×3=3)**

(i) सर्वां वार्तां ज्ञातुम् (............+...........) कौशलः अपृच्छत्।

(ii) पाठम् अधि + इ + ल्यप् (.................) शयनम् कुरु।

(iii) बालकः पितरम् नत्वा (.........+.........) पठति।

**प्र.11 अधोलिखितेषु पदेषु प्रयुक्तान् उपसर्गान् पृथक् कृत्वा लिखत–** **(½×4=2)**

(i) प्रत्यागच्छति

(ii) सम्भूयः

(iii) अवदानम्

(iv) परिहीयते

## खण्डः - घ (पठितावबोधनम् - 35 अंकाः)

**प्र.12 अधोलिखितम् गद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

"तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यमभिज्ञातवती। सूर्यातपे तण्डुलान्निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत् – भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ। काकोऽब्रवीत् – अहं त्वत्कृते सोपानमुत्तारयामि। तत्कथय स्वर्णमयं रजतमयं ताम्रमयं वा। गर्वितया बालिकया प्रोक्तम् स्वर्णमयेन सोपानेनाहमागच्छामि परं स्वर्णकाकस्तत्कृते ताम्रमयं सोपानमेव प्रायच्छत्। स्वर्णकाकस्तां भोजनमपि ताम्रभाजने ह्यकारयत्।"

**अ) एकपदेन उत्तरत -** **(1×2=2)**

(i) अपरा वृद्धा कीदृशी आसीत्?

(ii) वृद्धायाः कति पुत्री आसीत्?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(i) गर्वितया बालिकया किम् प्रोक्तम्?

(ii) स्वर्णकाकः वृद्धायाः दुहितायै कस्मिन् पात्रे भोजनम् अकारयत्?

**स) निर्देशानुसारं उत्तरत–** **(½×4=2)**

(i) 'एका' शब्दस्य विपरीतार्थकः कः शब्दः अत्र प्रयुक्तः ?

(ii) 'भो नीचकाक ! अहमागता' इति कया उक्तम् ?

(iii) 'अभिज्ञातवती' इति क्रियायाः कर्तृपदं किम् ?

(iv) 'लुब्धा वृद्धा' अनयोः विशेष्यपदं किम् ?

**प्र.13 अधोलिखितम् पद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

"आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥"

**अ) एकपदेन उत्तरत -** **(1×2=2)**

(i) खलसज्जनानाम् मैत्री कीदृशी भवति ?

(ii) दिनस्य पूर्वार्धे छाया कीदृशी भवति ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(i) दिनस्य परार्धे छाया कीदृशी भवति ?

(ii) खलानां मैत्री कीदृशी भवति ?

**स) निर्देशानुसारं उत्तरत–** **(½×4=2)**

(i) 'अनन्तरं' इति पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम् ?

(ii) 'पश्चात्' इत्यस्य किम् विलोमपदं अत्र प्रयुक्तम् ?

(iii) 'आरम्भः' इत्यस्मिन् पदे कः उपसर्गः वर्तते ?

(iv) 'सज्जनानाम्' इति पदस्य विभक्तिं वचनं च लिखत ।

**प्र.14 अधोलिखितम् नाट्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

(ततः प्रविशति करतलाभ्यां चक्षुषी मार्जयन्ती पञ्चवर्षदेशीया बालिका सोमप्रभा)

**विमला** – अये जागरिता ! त्वरस्व तावत् । परिहीयते विद्यालयगमनवेला ।

**सोमप्रभा** – अम्ब ! अद्य न गमिष्यामि विद्यालयम् ।

**विमला** – (हस्तेन सोमप्रभां गृहीत्वा) अये किमेतत् कथयसि । विद्यालयस्तु गन्तव्य एव प्रतिदिनम् । (सोमप्रभायाः प्रस्थानम्)

**श्वश्रूः** – विमले ! अयि दुष्टे ! कुत्र मृतासि ? कियतः कालात् शब्दापयामि ?

**विमला** – (सकरुणं निशम्य) इयं मम श्वश्रूः सदैव मर्मघातिभिः कटुवचनैराक्षिपति माम् । (उच्चैः स्वरेण) अम्ब ! इयमागच्छामि । किम् करणीयम् ? (परिक्रामति)

**अ) एकपदेन उत्तरत -** **(1×2=2)**

(i) सोमप्रभायाः मातुः नाम् किम् अस्ति ?

(ii) अस्मिन् नाट्यांशे ' पञ्चवर्षदेशीया' का ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(i) करतलाभ्यां चक्षुषी मार्जयन्ती रंगमञ्चे का प्रविशति ?

(ii) विमलां प्रति तस्याः श्वश्रूः कथमाक्षिपति ?

**स) निर्देशानुसारं उत्तरत–** **(½×4=2)**

(i) 'शीघ्रतां कुरु' इत्यर्थे किं पदं अत्र प्रयुक्तम् ?

(ii) 'कटुवचनैः' अत्र विशेष्यपदं किम् ?

(iii) 'नयने' इत्यस्य किम् पर्यायपदं अत्र प्रयुक्तम् ?

(iv) 'अम्ब! इयमागच्छामि ।' अत्र क्रियापदं किम् ?

**प्र.15 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –** **(1x5=5)**

(i) सर्वरत्नभूमिर्नगेन्द्रः <u>हिमवान्</u> अस्ति ।

(ii) स महतीं <u>वैदुषीम्</u> लब्धवान् ।

(iii) सः <u>कल्पतरवे</u> न्यवेदयत् ।

(iv) अनया <u>दुष्टया</u> चायभाजनानि त्रोटितानि ।

(v) <u>नदीनाम्</u> कान्तसलिलम् सलीलम् उच्छलेत् ।

**प्र.16 निम्नलिखितश्लोकयोः अन्वयं मञ्जूषातः समुचितपदं चित्वा पूरयत–**

(क) गुणेष्वेव हि कर्त्तव्यः प्रयत्नः पुरुषैः सदा । **(½x4=2)**

गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥

**अन्वयः** – पुरुषः सदा हि ........ (i)..........एव प्रयत्नः...........(ii).........। (यतः) गुणयुक्तः.........(iii)...........अपि, अगुणैः (युक्तैः)..............(iv).........समः न (अपितु श्रेष्ठः भवति) ।

(ख) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः । **(½x4=2)**

तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

**अन्वयः** – सर्वे............(i).........प्रियवाक्यप्रदानेन..........(ii)...........। तस्मात् (सर्वैः)

........(iii)............वक्तव्यम् वचने का .............(iv).............।

| मञ्जूषा - | **दरिद्रः, गुणेषु, दरिद्रता, कर्त्तव्यः, तुष्यन्ति, जन्तवः, ईश्वरैः, तदेव,** |
|---|---|

**अथवा**

**निम्नलिखितश्लोकं पठित्वा मञ्जूषायाः पदानि चित्वा भावार्थं पूरयत–**

"निनादय नवीनामये वाणि ! वीणाम्, मृदुं गाय गीतिं ललित-नीति-लीनाम् ।

मधुर-मञ्जरी-पिञ्जरी-भूतमालाः, वसन्ते लसन्तीह सरसा रसालाः ।

कलापाः ललित-कोकिला-काकलीनाम्, निनादय नवीनामये वाणि ! वीणाम् ॥"

**भावार्थः -** अये वाणि ! नवीनां वीणां .......... (i)…………..। ललित-नीति-लीनाम् गीतिं मृदुं गाय। इह ..........( ii)………… मधुर-मञ्जरी-पिञ्जरी-भूतमालाः सरसाः ............( iii)…….. लसन्ति। ललित-कोकिला-काकलीनाम्...........(iv)...........(विलसन्ति)। **(1x4=4)**

**मञ्जूषा -** | **कलापाः, रसालाः, वसन्ते, निनादय** |

**प्र.17** **घटनाक्रमानुसारं अधोलिखितवाक्यानि क्रमेण पुनः लिखत–** **(½x8=4)**

क) स्वसचिवैश्च प्रेरितः तस्य गुणैः प्रसन्नः राजा तं यौवराज्येऽभिषिक्तवान्।

ख) सः पृथ्वीमदरिद्रां कर्तुं कल्पवृक्षाय निवेदयति।

ग) पुरा सानोरुपरि कञ्चनपुरनगरे जीमूतकेतुः नाम नृपः वसति स्म।

घ) अतः जीमूतवाहनः स्वमनोरथं साधयितुं कल्पवृक्षम् आराधयति।

ङ) सः राजा कल्पतरुम् आराध्य जीमूतवाहनं नाम पुत्रं प्राप्नोत्।

च) सः कल्पतरुः भुवि वसूनि अवर्षत्।

छ) तदा पितृमन्त्रिभिः उक्तः - कल्पतरुः तव सदा पूज्यः।

ज) जीमूतवाहनस्य यशः सर्वत्र प्राथितम्।

**प्र.18** **अधोलिखितपदेषु पर्याय पदेन सह मेलनं कृत्वा लिखत–** **(1x4=4)**

(i) निदाघे - धनानि

(ii) वारिवाहाः - ग्रीष्मे

(iii) वसूनि - पुत्रवधूः

(iv) स्नुषा - घनाः